# व्यक्तितत्त्वविमर्शः

प्रो. राधावल्लभः त्रिपाठि

आङ्ग्लभाषायां 'पर्सनालिटी' ति व्यपदिष्टस्य पदार्थस्य कृते संस्कृतभाषायां न वर्तते समीचीनः कश्चनशब्दः। 'पर्सनालिटी' ति पदार्थस्तावदस्मच्चिन्तन-परम्परायां शास्त्रधारायां वा विजातीय एवेत्याममन्ति आधुनिकाः सुधियः समीक्षकाः। 'व्यक्तित्व' मिति कश्चनशब्द आधुनिकभारतीयभाषासु हिन्द्यादिषु पर्सनालिटीतिपदार्थस्य कृते नवीनो विनिर्मितः प्रयुज्यमानश्च दृश्यते श्रूयते वा। तत्र व्यक्तिर्नाम 'पर्सन' - पदार्थं व्यनक्ति। तद्भावः व्यक्तित्वम्। इदं च व्यक्तित्वं नाम यथाऽस्मच्छास्त्रपरम्परायामनुपलभ्यमानं तथैव तद्व्यञ्जकः शब्दोऽपि व्याकरणविच्युतः।

ननु अस्य तावत् च्युतसंस्कारदूषितस्य शशविषाणायमाणस्य व्यक्तित्वस्य पर्सनालिटीति तत्त्वस्य वा सत्त्वे किं मानमिति चेदुच्यते - इह तावत् प्रत्येकं जन्तुः अन्यस्मात् पृथक् परिचीयते। यद्वशादयं गौः अन्यस्मात् गौः भिन्नः अयं मनुष्य इतरेभ्यो सर्वेभ्यो वा भिन्न इति भिन्नाधानप्रत्ययोत्पत्तिस्तदेव व्यक्तित्वं पर्सनालिटीति वा तत्त्वम्। तद्द्वारेणेव एकस्य नरस्य अन्यस्मात् एकस्या स्त्रिय अन्याभिर्वा स्त्रीभिर्विशेषो विज्ञायते। ननु आकृतिविशेषादेव विशेषो ज्ञायत एवेति किमतिरिक्तस्य व्यक्तित्वस्य स्वीकारेण, तत्स्वीकृतौ च गौरवदोष एवेति चेन्न; यमजयोर्बालकयोराकृतिसाम्येऽपि तयोर्भेदस्य तत्तद्व्यक्तित्ववशादेव पृथक्बोधात्। अथ - यथा रामैश्यामौ यमजौ बालकौ, तयोरेकतरस्य बालकस्य अन्यस्माद्

बालकात् सत्यामपि सर्वथा संवादिन्यामाकृत्यां चेष्टायाः व्यवहारस्य च भूयान् भेदो भवति, अतश्च तत्तद्बालकस्य चेष्टाव्यवहारादिकं दर्शं दर्शं विज्ञातुं शक्यते - रामोऽयं न श्यामः, तत्किं व्यक्तित्वस्वीकारेणेति यद्युच्येत, तदपि न विचारसहम्। यतो हि सत्यप्याकृतिसाम्ये यद्वशाद् भवति चेष्टायाः व्यवहारस्य शीलस्य च भेदस्तदेव व्यक्तित्वमिति तत्त्वम्। अस्मिंश्च व्यक्तित्वे वेदान्तप्रोक्तं सूक्ष्मशरीरम्[1] सांख्यनिरूपितं लिङ्गशरीरं पाञ्चभौतिककलेवरश्च युगपत् समाविष्टे। वेदान्ते ज्ञानेन्द्रियसहिता बुद्धिर्विज्ञानमयकोशो जीवो वा प्रोच्यते। तथैव कर्मेन्द्रियसहितं मनो मनोमयकोशः। व्यक्तित्वे तु विज्ञानमय - मनोमय - प्राणमयान्नमयानां समवेतत्वम्। केषाञ्चिद् व्यक्तित्वमानन्दमयाधिरोहि भवति, अपरेषां प्राणमयविश्रान्तमितरेषां चान्नमयनिपतितम्। सांख्यदर्शने लिङ्गशरीरं तावद् धर्म, - ज्ञान - विरागैश्वर्यैरथवा अधर्माज्ञानरागानैश्वर्यैर्भावैरधिवासितं मतम्। एतैश्च भावैरधिवासितमिदं लिङ्गं संसरति नानायोनिषु समवाप्नोति विविधान् स्थूलदेहान्।[2] इत्थं च स्थूलदेहाच्छादितं लिङ्गशरीरमेव व्यक्तित्वं नरस्य। इदं च लिङ्गं तत्त्वत एकमपि भोदकाले कर्मभेदात् भेदं गच्छति, नानारूपंच भवति। अत एव कर्मविशेषैर्व्यक्तिभेदं स्वीकरोति सांख्यसूत्रकारः।[3]

अयं तावदत्र विशेषः। सांख्ये वेदान्ते च सूक्ष्मशारीरं स्थूलशरीरात् पृथक्भूतापि सञ्चरति। व्यक्तित्वं नाम कस्यचिन्नरस्य देहावच्छिन्नशील - स्वभाव - संस्कार - चरित्र - मनोबुद्ध्यहङ्कारचित्तानां समवायः, समेषां तत्त्वानां तत्र अविभाज्यसाहित्यं, न ततः किमप्येकं तत्त्वं पृथक्कर्तु शक्यम्।

आलङ्कारिकास्तावत् सहृदयस्वरूपनिरूपणे तदीयं व्यक्तित्वमेव सहृदयताहेतुत्वे सङ्केतयन्ति। जातमात्र एव जन्तुः काभिश्चित् संविद्भिः परीतो

भवति। त एव स्थायिभावा भवन्ति अनुभूयन्ते च काव्यनाट्यादिश्रवणावलोकनकाले। न च सर्वैरपितु ये सहृदयास्तैरेवानुभूयन्ते, ते च व्यक्तित्वविशेषसम्पन्ना अत एवानुभवक्षमाः। 'येषां काव्यानुशीलनवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता त एवसहृदयसंवादभाज' इति निगदता आचार्येणात्र सहृदयाख्यया व्यक्तेः स्वरूपं निरूपितम्। तस्माच्च ज्ञातुं शक्यते तस्याः व्यक्तेः व्यक्तित्वपरिष्कारप्रक्रियाऽपि।

ननु सत्यम्, दुर्जनतोषन्यायेन स्वीकुर्मस्तावत् व्यक्तित्वं नाम किमपि तत्त्वम्। तथापि हंहो महापुरुष यदि नामेतत् तथा महिमशालि तत्त्वम्, तर्हि, किमर्थं नास्य स्वरूपं प्रतिपादितं कपिल-कणाद-गोतमादिभिः ? अत्रोच्यते - इह तावत् किं नाम कारणं तथाकथित - व्यक्तित्व - पदार्थस्यानुपब्धेरस्माकं शास्त्रपरम्परायामिति विचारणीयम्। इयं तु परम्परा "यो वै भूमा तत् सुखम्, नाल्पे सुखमस्ति" श्रुतौ बद्धादरा वर्तते। यत्र आनन्त्ये धीर्विश्राम्यति तत्र को नामावकाशः स्यात् अल्पस्य कथित - व्यक्तित्व - पदार्थस्य कृते ? यथैवास्माकममरकोशे तथैवास्माकं विचारकोशेऽपि पदं न प्रापुः व्यक्तिर्व्यक्तित्वं व्यक्तिवादश्चेति शब्दाः तत्पदार्थाश्च।

परन्त्विदमत्र चिन्तनीयम् । मा नाम स्यात् आदर आधुनिकव्यक्तित्व-व्यक्तिवादादीनां कृते परम्परायां, तथापि या पर्सनालिटीति कथिता सा सद्वा असद्वा? यदि सत्, तर्हि तद्विचारः करणीयः कामं भूमाविरोधि अल्पं वस्तु सा स्यात्। यदि असत् तर्हि तदसत्त्वे प्रमाणमुपस्थापनीयम्। इदमत्र विमृशामः। व्यवहारदृशा तु पर्सनालिटीति पदार्थस्य सत्ताया अपलापः कर्तुं न शक्यते। प्रत्यक्षमेव सर्वत्रानुभूयमानत्वात्, अस्य जनस्य पर्सनालिटी प्रभावशालिनी, अपरस्य चास्य न तथेति व्यवहारप्रसिद्धेः। प्रत्येकं मनुष्यः काचन व्यक्तिः। तस्य

तत्त्वं स्वरूपमेव व्यक्तितत्त्वं व्यष्टिमत्त्वं व्यक्तित्वं वा। जातिव्यक्तित्याकृतयः पदार्था इति महर्षिर्गौतम आह। जातिमत्यां व्यक्तौ च स सङ्केतं मेने। जातिमती व्यक्तिरेव पर्सनालिटीति वक्तुं शक्यते। तत्रव्यक्तेः भौतिकं रूपं कर्मेन्द्रिय-ज्ञानेन्द्रियसहितं, आधिदैविकं च तदीयं तत्वं तथैव च तदीयमाध्यात्मिकमपि गुढं स्वरूपं सर्वमन्तर्भूतम्। अत एव अल्पमेवेदं किमपि तुच्छं तत्त्वमत एवोपेक्षणीयमित्यपि विचाकिताभिदानम्।

कालिदासेन तु -

आकारसदृशप्रज्ञः प्रज्ञयासदृशागमः ।
आगमेन सदृशारम्भ आरम्भसदृशोदयः ॥

इत्यादि निगदता रघुवंशे दिलीपस्य राज्ञो व्यक्तित्वमेव सम्यक् प्रत्यपादि । आकृति-प्रज्ञा - ऽऽगमारम्भोदयानां समन्वितं रूपमेव व्यक्तितत्त्वं, व्यक्तिमत्त्वं व्यक्तित्वं वेति अस्माकमपि विवक्षितत्वात् ।

वेदाश्चैनं रूपं, तत्त्वं स्वरूपं च प्रतिपादयन्ति । यथोक्तमथर्वाङ्गिरसे -

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद् यक्षमातन्वत् तद् वै ब्रह्मविदो विदुः ॥ (अथर्व. १०.९.४३)

कठोपनिषदि च -

आत्मानं रथिनं विद्धि, शरीरं रथमेव तु ।
बुद्धिंतु सारथिं विद्धि मनः प्रग्रहमेव च ।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥

(कठो. १.३.३-४)

इति यत् आत्मेन्द्रियमनोयुक्तत्वं भोक्तृत्वं प्रतिपादितं तदेव व्यक्तित्वम् । अत्र तावत् आत्मा, मनः, बुद्धिः, शरीरमिंद्रियाणि चेति पञ्च पदार्था वर्णिताः । ऐतेषां समन्वितं रूपमेव पर्सनालिटीति व्यक्तित्वं वेति वक्तुं शक्यते । परन्तु ये साम्प्रतिका मनोवैज्ञानिकाः व्यक्तित्वस्य पर्सनालिटीति पदार्थस्य वा विमर्शं विदधति, तेतु न मनो-बुद्धि-विलक्षणस्य आत्मनः सत्तां स्वीकुर्वन्ति । अतस्तेषां मतेन आत्मविरहितं मनोबुद्ध्याद्यवच्छिन्नं शरीरमेव व्यक्तित्वम् ।

अन्यच्च यावन्त्यो व्यक्तयस्तावन्त्येव तासां परमार्थतया व्यक्तित्वानीति आधुनिका मन्यन्ते । अत्र तावत् आत्मात्वेक एव । अतस्तदधिष्ठितानां मनोबुद्धिसहितदेहानां यत् पृथक् पृथक् व्यक्तिमत्त्वं न तत्र परमार्थतो भेदः । सांख्ये तावत् पुरुषबहुत्वं स्वीकृतम् । जगति यावन्तो मनुष्याः, पशवः प्राणिनो वा तावन्तः सन्ति पुरुषाः । यदि सन्ति नाना पुरुषास्तर्हि कथं तेषाम् पृथक् पृथक् ज्ञानं स्यात् । यथा प्रकृतिर्नानाश्रयत्वेन नानात्वं भजते, तथैव पुरुषोऽपि नाना देहेषु उपाधिभेदान्नानात्वमापद्यते । आकाशस्येव घटादिभिरुपाधिभिरिह नानात्वम्। यथोक्तं सांख्यसूत्रे - उपाधिभेदेऽप्येकस्य नाना योग आकाशस्येव घटादिभिः । (सांख्यसूत्रे १.१५०) इत्थं देहावच्छिन्नः पुरुषो व्यक्तिं गतः, व्यक्तिमत्त्वमाप्नोति, पुरुषविशेषश्च जायते । इत्थं च घटावच्छिन्न आकाशो घटे स्थानादेकस्मादन्यत्र नीयमाने अन्यत्र गच्छन्निव प्रतिभाति, एवमेव पुरुषोऽपि देहावच्छिन्नः देहे गच्छति गच्छन्निव प्रतीयते । (गतिश्रुतिरप्युपाधियोगादाकाशवत् - तत्रैव, १ १५१) उक्तं च ब्रह्मबिन्दूपनिषदि-

घटसंहतमाकाशं नीयमाने घटे यथा ।

घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः ॥ (ब्रह्मबि. १३)

सांख्यदृशा तु चिच्छायापत्तिविरहितं व्यक्तित्वमिदं सर्वथा अचेतनं स्यात्। पुरुषस्यगतचैतन्यस्य सङ्क्रान्त्यैव अचेतनमपि चेतनवददिदं भवति । अतः सांख्यदृशा चिच्छायापन्नस्य मनोबुद्ध्यवच्छिन्नस्य कस्यचिद् देहस्यैव व्यक्तिरिति संज्ञा स्तात्, तस्य भावश्च व्यक्तित्वमिति ग्राह्यम् । योगवार्तिककारस्तु पुरुष-प्रकृत्योर्मध्ये बिम्बप्रतिबम्बभावस्यनाद्यनन्तां शृङ्खलां स्वीकुरुते । तथाहि - पुरुषस्य चैतन्यसङ्क्रान्तिः प्रकृतौ, तेन मनोबुद्ध्यादीनां अचेतनानामपि सचेतनताप्रतिभासः, तत्प्रतिभासस्य च पुनः सङक्रान्तिः पुरुषे, तस्माच्च पुरुषस्यापि मनसि सुखिते, दुःखिते अहं सुखी वा दुःखी वेति प्रतीतिः, पुरुषगतप्रतीतीनां च पुनः सङ्क्रान्तिर्मनोबुध्यादिषु, तेन च तेषां मनोबुद्ध्यादीनां पुनः सचेतनतापत्तिः, पुनरस्याः सचेतनतापत्तेः प्रतिसङ्क्रान्तिः पुरुषे इति बिम्बप्रतिबिम्बभावानां परस्परं पुरुष-प्रकृतिगतानाम् आवृत्तिरसकृद् भवति परस्परस्य सम्मुखं स्थापितयोर्मुकुरयोरिव । इत्थं चात्र योगवार्तिकमतेन पुरुषप्रकृतिगतानाम् बिम्बप्रतिबिम्बभावानामावृत्तिशृङ्खलाजनितं चैतन्यमेव व्यक्तित्वमिति सुकरं वक्तुम् । ननु चेतनपुरुषस्यैव प्रतिबिम्बात् मनोबुद्ध्यादीनां सचेतनत्वमिव भवति, तेन च संसारः सृष्टिर्वा भवत्येव, तत् कथं पुरुषे पुनः एतेषां प्रतिबिम्बस्य पुनः सङ्क्रान्तिरिति चेन्न । योगवार्तिककारस्तु इमामेव शङ्कामुत्थाप्य समाधत्ते -

ननु सविषयवृत्तेःस्फुरणं चेतनसंयोगादेव भवतु यथा सजलघटादिप्रकाशः सूर्यसम्बन्धात्, अतः किमर्थं चैतन्ये वृत्तिप्रतिबिम्बं वृतौ वा वक्ष्यमाण-चैतन्यप्रतिबिम्बं कल्प्यते, सुख्यहं जानामीति बुद्धिपुरुषयोरेकताभ्रमस्तु परस्परप्रतिबिम्बं विनाऽपि दूरस्थवनस्पत्योरिव दोषवशादेव सम्भवति, तत्कथं बुद्धिपुरुषयोर्वृत्तिसारूप्यसिद्धरिति । अत्रोच्यते - चेतने तावत्

बुद्धिप्रतिबिम्बमवश्यं स्वीकार्यं, अन्यथा कूटस्थनित्यविभु-चैतन्यस्य सर्वसम्बन्धादेव सर्वं वस्तु सर्वैर्ज्ञायेत, न हि सूर्यसम्बन्धे सति घटाद्यप्रकाशो दृष्ट इति ।

आधुनिके मनोविज्ञाने तावत् ब्रेन व्यपदिष्टस्य मस्तिष्कस्य माइण्ड-संज्ञकस्य मनसश्च विशेष ऊरीकृतः । मस्तिष्कं नाम यन्त्रम् । तस्य यंत्रस्य नियामकं चालकं वा मनः । कठोपनिषदुक्ता उपमा अत्र परिवर्त्य प्रयोगमापादयितुं शक्यते । तद्यथा - मस्तिष्कं रथः, मनश्च सारथिरिति । अत्र मनो नाम चेतनं वस्तु, तच्च चालयति शरीरमिति मन्यते । सांख्यदृशा तावत् मनो-बुद्ध्यहङ्कारादयः जडायाः प्रकृतेःप्रादुर्भूताः, न ते स्वयं सचेतनाः । पुरुषस्य चिच्छायापत्तेः बुद्धिर्महत् - तत्त्वं वा सचेतनमिव भवति । मनोवैज्ञानिकस्तावन्न मनो-बुद्धिव्यतिरिक्तम् आत्मपदार्थमूरीकुर्वन्ति । ते मन्यन्ते मनो-बुद्धिव्यतिरिक्तं अवचेतनं तत्त्वम् । इदं चावचेतनं स्वयमज्ञायमानमपि अज्ञातज्ञापनं कुरुते, धारयति च नाना स्मृतीः संस्कारांश्च । भारतीयदर्शने इदमेव चित्तमिति प्रोच्यते । अतश्च मनोबुद्ध्यहङ्कारचित्तानि चत्वार्यपि चेतनायाः विशेषरूपाणि स्वीक्रियन्ते । पूर्वजन्मार्जिताः संस्काराः विस्मृतानां प्रसङ्गानामवधारणाश्च चित्ते ध्रियन्ते । तस्माच्चेतसा एव च मनसि स्मृतपथे आपाद्यन्ते । यथोक्तं कालिदासेन-

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत् सुखतोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ।

इत्थं च मनोबुद्ध्यहङ्कारचित्तविशिष्टं शरीरमेव व्यक्तिः । तस्य स्वरूपं

व्यक्तित्वमिति वक्तुं शक्यते । अस्मिंश्च व्यक्तित्वे मनसि उद्रिक्ते सङ्कल्पविकल्पानां प्राधान्यं, बुद्धौ उद्रिक्तायां निश्चयस्य, अहंङ्कारे जाग्रति अहम्भावस्य चित्तस्य च प्राधान्यात् विविधचित्तवृत्तीनां प्रवाहाः प्रवहन्ति, आवर्तबुद्बुदतरङ्गततिसङ्कुलायां प्रवहमाणायां नद्यामिव । व्यासभाष्यकारेण इदमेव व्यक्तित्वं चेतनानदीति व्यपदिष्टम् । अस्यां च चेतनानद्यां क्षिप्तमूढविक्षिप्तैकाग्रनिरुद्धाः पञ्चभूमय भवन्ति । क्षिप्तायां रजोगुणस्य, मूढायां तमोगुणस्य, एकाग्र-निरुद्धयोश्च सत्त्वगुणस्य प्राधान्यम् । प्रख्या-प्रवृत्ति-स्थितिभिस्त्रिविधैः शीलैरियं चेतना ऊर्ध्वगामिनी अधोगामिनी वा भवति । इत्थं च पञ्चभूमिभिः पञ्चशीलैश्च नराणां व्यक्तित्वं वैविध्यं भजते । स्पैंगलराख्यो मनोवैज्ञानिकः व्यक्तित्वं षड्विधं मनुते - सिद्धान्तवादि, अर्थवादि, सौन्दर्यवादि, समाजप्रवणम्, राजनीतिप्रवणं, धार्मिकं चेति भेदैः । एतेषु षड्भेदेषु प्रथमान्तिम-प्रकारयोः सत्त्वगुणप्राधान्यम् निरुद्धा च चितभूमिः । इतरेषु तु रजोगुणस्य प्राधान्यम् । एवमेव मनौवैज्ञानिकमूर्धन्यो जुङ्गः बहिर्मुखम् अन्तर्मुखं चेति द्विविधं व्यक्तित्वविभागमूरीकरोति । तयोश्च बहिर्मुखव्यक्तित्वसम्पन्ना जनास्तावद् रजोगुणप्रधानान्तःकरणाः, अन्तर्मुखास्तु सत्त्वगुणप्रधानाः ।

अस्यां च चेतनायां वृत्तीनां प्रवाहा अन्यथात्वमनिशं विदधति । तथाहि प्रमाणविपर्यविकल्पाश्चित्तत्वृतय योगसूत्रकारैः प्रतिपादिताः । ताभिः क्वचित् निश्चयात्मकं संशयात्मकं विकल्पात्मकं वा भवति अन्तःकरणम् । एवमेव बाह्यजगति प्रकृतिनटी विरचयति विविधानि चित्राणि सृष्टेश्चित्रफलके, यानि दर्शं दर्शमपि विविधाभिः वृत्तिभिरन्यथात्वं भवति चेतसः । यदुक्तं कालिदासेन -

मेघालोके भाति सुखिनोऽप्यन्यथावृत्ति चेतः ।<br>
कण्ठाश्लेषप्रणायिनि जने किं पुनर्दूरसंस्थे ।

तथापीदमन्यथात्वं व्यक्तित्वस्य विवर्तान् जनयति, न परिणामान् । यथा सागरो वेलां नोल्लङ्घययति, तिष्ठति च सदैव तथा, परन्तु प्रादुर्भवन्ति तस्मिन् आवर्त-बुद्बुदरतरङ्गमयाः विकारा विलीयन्ते च तस्मिन्नेव, तथैव नरस्य व्यक्तित्वे प्रादुर्भवन्ति अनन्ता वृत्तयो विलीयन्ते च तत्रैव । क्वचित्तु अदृष्टोऽप्यर्थस्तत्र क्षोभं जनयति । तताहि -

हरस्तु किञ्चित् परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।

अत्र सहकारारतरौ लीने शरसन्धानं कुर्वति कामे हरेणादृष्टेऽपि तत्संरम्भः मनाक् क्षोभं रचयति । ननु सर्वमिदं विवेचनं चैतन्यमेव प्रधानतया विषयीकरोति, व्यक्तित्वे तावत् यथा अन्तःकरणस्य चित्तवृत्तीनां वा समावेशस्तथैव पाञ्चभौतिकशरीरस्यापीति निरर्थकमेव आधुनिकव्यक्तित्वविवेचनस्य प्रत्नभारतीयचिन्तनदिशा त्वदीयं व्याख्यानमिति चेन्न । शरीरमाद्यं खलु धर्मसाधनमिति कथयता महाकविना यथा शरीरस्य महत्त्वमूरीकृतं तथैव पतञ्जलिप्रभृतिभिरपि शरीरस्य । योगसूत्रे (३.४६) कायसम्पद्विवेचनमनया दिशा द्वारं किमपि समुद्घाटयति । पतञ्जलिना तत्र रूप-लावण्य-बल-वज्रसंहननत्वविशिष्टा कायसम्पद्विवेचिता ।

उन्मीलितं नवीनं निगमागमसम्मतं व्यक्तितत्त्वम् ।
राधावल्लभकविना तोषाय भवेद् बुधानां तद् ॥

सन्दर्भाः

१. सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीरणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं, बुद्धिमनसी, कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति । वेदान्तसारे, मत्सम्पादिते, इलाहाबादात्, १९७७, पृ. २२

२. संसरति निरूपभोगं भावैरधिवासितं लिङ्गम् । सांख्यकारिकायाम् ४७

३. व्यक्तिभेदः कर्मविशेषात् । सांख्यसूत्रे ३.१०